This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
श्रीमद्भपुराणांतर्गत रामचरित्र	–	दर्शन	अपूर्ण	–	3/12	32	संस्कृत	कागद				

M-2971

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ददंतिदर्शनंस्वप्नेभक्तियुक्तेनराघव ॥ अवियोगंचतेपित्राभ्रात्राचभरतेनच ॥ ३० ॥ चतुर्दशानांवर्षाणां भविताराघवध्रुवं ॥ कुरु
श्राद्धं तथावीरराज्ञोदशरथस्यतु ॥ ३१ ॥ अमीचऋषयः सर्वेतवभक्ताकृतक्षणाः ॥ अहंचजमदग्निश्चभरद्वाजश्चलोमशः ॥ ३२
॥ देवरातोसमीकश्च षडेतेचद्विजोत्तमाः ॥ श्राद्धेचतेमहाबाहोसंभारांस्त्वमुपाहर ॥ ३३ ॥ मुरव्यंचेंगुदिपिण्याकंवदरामलकैः
सह ॥ श्रीफलानिचपक्वानिमूलंचोच्चावचंबहु ॥ ३४ ॥ मार्गेणेवाथमांसेन धान्येनविविधेनच ॥ तृप्तिंप्रयच्छविप्राणांश्राद्धदा
नेनसुव्रत ॥ ३५ ॥ पुष्करारण्यमासाद्यनियतोनियतासनः ॥ पितृंस्तर्पयतेयस्तुसोश्वमेधमवाप्नुयात् ॥ ३६ ॥ स्नानार्थेचव
यंरामगच्छामोज्येष्ठपुष्करं ॥ इत्युक्त्वातेगताःसर्वेऋषयोराघवंनृप ॥ ३७ ॥ लक्ष्मणंचाब्रवीद्रामोमेध्यमाहरवैमृगं ॥ शुद्धेषुना
शशंकृष्णराघवगशाकं तथामधु ॥ ३८ ॥ भूर्वीराणिचमुरव्यानिपनसान्युत्तमानिच ॥ पारदानिचबिल्वानिमधुराणिपरंतप ॥ ३९ ॥
शाः श्रीनिकसेरूणिपीतवर्णांचकावरां ॥ करीराणिचमुरव्यानिशृंगाटाः शर्करोपमाः ॥ ४० ॥ पक्वानिचकपित्थानिफलान्यन्या
निच ॥ तान्याहरस्ववैश्राद्धेक्षिप्रमेवास्तुलक्ष्मण ॥ ४१ ॥ तथाततकृतवान्सर्वंरामादेशाच्चराघवः ॥ वदरेंगुदशाकानिमूला
विविधानिच ॥ ४२ ॥ तत्राहृत्यचरामेणकूटाकारःकृतोमहान् ॥ परिपक्वंतुजानक्यासिद्धंरामेनिवेदितं ॥ ४३ ॥ स्नात्वावि
वाप्यांसः मुनींस्तानन्वपालयन् ॥ मध्याह्नेचलितेसूर्येकालेकुतपिकेतथा ॥ ४४ ॥ आयाताऋषयः सर्वेयेरामेणानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताः॥ तानागतान्मुनीन्दृष्ट्वा वैदेही जनकात्मजा॥ अपसर्पन्ततो दूरे विपापा मध्यतःस्थिता॥४६॥ गुल्मैराच्छाद्य चा- रा॰च॰
नं निगूढा सा तदा स्थिता॥ अपक्रांतां तदा सीतां ज्ञात्वा राघवनंदनः॥४७॥ विमिमर्श चिरंकालं किमर्थमेषासत्वरा॥ अ
च गता सा तु मन्ये तां च त्रपान्वितां॥४८॥ किंतावद्भोजयेद्विप्रान् सीतामन्वेषयामि किं॥ कारणं नाभिजानामि श्राद्ध
काल[...]पस्थिते॥४९॥ रामेण भोजिता विप्रा इत्युक्तेव यथाविधिः॥ वैदिकी च कृता सर्वा क्रिया या मानवी स्मृता॥५०॥ पु
राणी[...]ंचैव वैश्वदेविकमुत्तमं॥ भुक्तवत्सु च विप्रेषु दत्वा पिंडान् यथाक्रमं॥५१॥ प्रेषिताश्च यथाशक्त्या दत्वा ते
षु च दक्षिणा॥ गतेषु द्विजमुख्येषु प्रियां रामोब्रवीदिदं॥५२॥ किमर्थं सुभ्रु नष्टासि मुनिं दृष्ट्वा इहागतान्॥ तत्सर्वं मम तन्वं
गि कारणं वद माचिरं॥५३॥ भवितव्यं कारणेन न ते गोप्यं प्रिये मम॥ ज्ञापितासि मम प्राणैः लक्ष्मणस्य शुचिस्मिते॥५४॥
एवमुक्ता तदा भर्त्रा त्रपयाधोमुखी स्थिता॥ विमुंचंती वाश्रुपातं राघवं वाक्यमब्रवीत्॥५५॥ शृणु त्वं नाथ यद्दृष्टं आश्च
र्यमिह यादृशं॥ गृहीतनामा रामेण राजेंद्रस्त्विह चागतः॥५६॥ सर्वाभरणसंयुक्तौ द्वौ चान्यौ च तथाविधौ॥ द्विजानां देह
संसक्ताः पितरस्ते रघूद्वह॥५७॥ ततस्तौ च मया दृष्टौ ब्राह्मणेषु च राघव॥ दृष्ट्वा त्रपान्विता चाहं अपक्रांता तदाश्रमात्॥५८ २
त्वया वै भोजिता विप्राः कृतं श्राद्धं यथाविधि॥ वल्कलाजिनसंवीता कथं राज्ञः पुरःसरा॥५९॥ भवामि रिपुवीरघ्न सत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेतदुदाहृतं ॥ कौशेयानि च वस्त्राणि कैकेयी चाप्युपाहरन् ॥ ६० ॥ तदा प्रभृति चैवाद्य धिग्राज्ञां चंचलां श्रियं ॥ ज्ञात्वाहं न
वदे किंचित्तवदुःखं भविष्यति ॥ ६१ ॥ नाहं स्मरामि वै मातुः न पितुश्च परंतप ॥ कदा भविष्यते चांतो वनवासस्य राघव ॥ ६२ ॥
एतद्दिवानिशं नाथ चिंतयंत्त्याः पुनः पुनः ॥ अजं तिदिवसाराम तव पादौ शपाम्यहं ॥ ६३ ॥ स्वहस्तेन कथं राज्ञो वने यं भो
जनं त्विमं ॥ दासानामपि ये दासा नोपभुंजंति कर्हिचित् ॥ ६४ ॥ तादृशं तु कथं तस्मै क्षमं दातुं वदस्व ह ॥ याहं राज्ञा पुरा दृष्टा
सर्वालंकारभूषिता ॥ ६५ ॥ बालव्यजनहस्ताच्च बीजयंती नराधिपं ॥ सा स्वेदमलदिग्धांगी कथं पश्यामि भूमिपं ॥ ६६ ॥
व्यक्तं त्रिविष्टपगतः त्वया पुत्रेण तारितः ॥ दृष्ट्वा मां दुःखितां बालां वने क्लिष्टामनागसां ॥ ६७ ॥ सामन्युः पार्थिवेन्द्रस्य तेन न
ष्टास्मि राघव ॥ भवान् प्राणसमो नाथ न ते गोप्यं मम त्विह ॥ ६८ ॥ सत्येनानेन ते नाथ स्पृशामि चरणौ च ते ॥ तच्छ्रुत्वा रा
घवः प्रीतः प्रियां तां प्रियवादिनीं ॥ ६९ ॥ अंगमानीय स्कंदं परिष्वज्य च सादरं ॥ भुक्त्वा भोज्यं तदा वीरौ पश्चाद्भुक्ता च जा
॥ ७० ॥ एवं स्थितौ च तद्दिनं तां रात्रिं तत्र राघवौ ॥ उदिते च सहस्रांशौ गमनाय मनो दधुः ॥ ७१ ॥ प्रत्यङ्मुखो गतः क्रोशं
ष्टं यावच्च पुष्करं ॥ पूर्वभागे पुष्करस्य यावत्तिष्ठति राघवः ॥ ७२ ॥ अशरीरात्ततो वाचा देवदूतेन भाषितं ॥ भो भो राघ
द्रं ते तीर्थमेतत्सुदुर्लभं ॥ ७३ ॥ अस्मिन्स्थाने स्थितो वीर आत्मानं पुण्यतां कुरु ॥ देवकार्यं त्वया कार्यं हंतव्या देवश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७४॥ततोहृष्टमनारामोअब्रवील्लुक्ष्मणंवचः॥अनुग्रहीतौसौमित्रेदेवदेवेनब्रह्मणा॥७५॥अत्राश्रमपदंकृत्वामासमेकंचल रा॰च॰
ण॥व्रतंचरितुमिच्छामिकायशोधनमुत्तमं॥७६॥तथेतिलक्ष्मणप्रोक्तोव्रतंपरिसमाप्यतां॥पिंडदानादिभिर्दानैःश्राद्धै
पितामहान्॥७७॥त्रिपुष्करेतदारामोतर्पयन्विधिवत्तथा॥कनकासुप्रभाचैवनंदाप्राचीसरस्वती॥७८॥पंचस्रोतापुष्क
रेषुपितॄणांप्रीतिदायिनी॥दैनंदनीऋषीणांतुपूज्यतांपितृपूर्वकं॥७९॥प्रीणायित्वातथारामोलक्ष्मणंवाक्यमब्रवीत्॥ए
हिलक्ष्मणशीघ्रंत्वंपुष्कराज्जलमानय॥८०॥पादप्रक्षालनंकृत्वाशयनंकुरुसत्तम॥विभावर्यांनिवृत्तायांयास्यामोदक्षिणां
दिशं॥८१॥लक्ष्मणस्त्वब्रवीद्रामं सीतामानयनांपयः॥नाहंरामसर्वकालंदासभावंकरोमिते॥८२॥इयंचपुष्टासुश्रोणी
पीवरीचसमायुतः॥करिष्यसेकिमनयाभार्ययावदसांप्रतं॥८३॥किंवामृतस्यतेप्रेत्यइयंयास्यनितेप्रिया॥रक्षसेत्वंस
दाकालंसुपुष्टांचैवसर्वदा॥८४॥करोषिक्लेशसहनंसततंमांरघूद्वह॥मय्यपिक्लेशिनेरामपरत्रेजायतेक्षतिः॥८५॥त्वत्कृ
तेचसदाचाहंपिपासाक्षुधयासह॥सहाम्यहंनसंदेहःपरत्रंचनिशामय॥८६॥मृतानांपृष्टतःकिंचिद्गतंनैवेह दृश्यते॥
भार्यासुतोधनंचापिएवमाहुर्मनीषिणः॥८७॥मृतस्त्वतेपितारामत्यक्त्वाराज्यमकंटकं॥विनिक्षिप्यवनेत्वांमांकैकेय्याप्रि ३
यकाम्यया॥८८॥इयंस्थितासाकैकेयीधनंसर्वेचबांधवाः॥महाराजोदशरथोएकएवगतोगतिं॥८९॥मन्येहंतुत्वयासा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वेप्रेत्ययास्यामिवैध्रुवं करिष्यसेकिमनयावदराघवसांप्रतं ९० श्रुत्वासनोक्तपूर्वंतुवाक्यंलक्ष्मणभाषितं विमनाराघवस्तस्थौसी-
ताचापिवरानना ९१ यदुक्तंलक्ष्मणेनाथसीतासर्वंचकारह स्नात्वाभुक्त्वाचतौवीरौपुष्करेपुष्करेक्षणौ ९२ नीत्वाविभावरींतत्रगम-
नायमनोदधुः एह्युत्तिष्ठस्वसौमित्रेव्रजामोदक्षिणांदिशम् सौमित्रिरब्रवीद्रामनाहंयास्येकथंचन व्रजत्वमनयासार्द्धंभार्ययाकमले-
क्षण ९४ नोग्रंवनंगमिष्यामिनैवायोध्यांचराघव इहस्थितोगमिष्यामिवर्षाणांचचतुर्दश ९५ मयाविनात्वयोध्यायांयदित्वंनग
मिष्यसि अनेनैवयथाभूयआगंतव्यंत्वयाविभो ९६ यदिजीवामितत्कालंपुनर्यास्येपुरंपितुः तापसोवाभविष्यामिमयात्वंकिं
करिष्यसि ९७ व्रजसौम्यशिवःपंथा मास्तुतेपरिपंथिनः पश्यामित्वांपुनःप्राप्तंसभार्यंकमलेक्षण ९८ पितृपैतामहंराज्यमयोध्या
यानराधिप शत्रुघ्नभरतौचोभौत्वदाज्ञाकरणेस्थितौ ९९ अहंतेप्रतिकूलस्तुवनवासेविशेषतः अनारतंदिवाचाहंरात्रौचैवपरंतप
१०० कर्मकर्तुंनशक्नोमिव्रजसौम्ययथासुखं एवंब्रुवाणंसौमित्रिमुवाचरघुनंदनः १ कथंपूर्वमयोध्यायानिर्गतोसिमयासह वनेवस्त्या-
म्य[illegible]रामनववर्षाणिपंचच २ ननुत्वयाविरहितःस्वर्गेपिनवसे क्वचित् यागतिस्तेनरव्याघ्रममसापिभविष्यति ३ प्रसादंक्रियतां-
मत्यद्यनयमामपिराघव इदानीमद्धमार्गेत्वंकथंस्थातासिशत्रुहन् ४ लक्ष्मणस्त्वब्रवीद्रामंनाहंगंतावनेपुनः लक्ष्मणंतुस्थितंज्ञात्वा-
रामोवचनमब्रवीत् ५ मामनुव्रजसौमित्रेएकोयास्यामिकाननं द्वितीयामेत्वियंसीतारामेणोक्तस्तुलक्ष्मणः ६ अनुगृह्यसपितृः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प.प. कर्षन्तस्थौलक्ष्मणस्तदा प्राप्तःपर्वतमर्यादांक्षेत्रसीमांपरंतपः ७ अजगंधंचदेवेशंदेवदेवंपिनाकिनं अष्टांगप्रणिपातेननत्वा- रा.च.
४ रामस्त्रिलोचनं ८ तुष्टावप्रणतःस्थित्वाभगवन्तमुमापतिं कृतांजलिपुटोभूत्वारोमांचितशरीरकः ९ सात्विकंभावमापन्नोवि
निर्धूतरजस्तमः लोकानांकारणंदेवंबुबुधेविबुधाधिपं १० रामउवाच कृत्स्नस्ययोस्यजगतःसचराचरस्यकर्त्ताकृतस्यचतथा
सुखदुःखहेतुः संसारहेतुरपियःपुनरंतकालेतंशंकरंशरणदंशरणंव्रजामि ११ यंयोगिनोविगतमोहतमोरजस्काःभक्त्येक-
तानमनसोविनिवृत्तकामाः ध्यायंतिनिश्चलधियोमितदिव्यभावंतंशंकरंशरणदंशरणंव्रजामि १२ यश्चेंदुखंडममलंविलसन्मयू
खंबध्वासदाप्रियतमाशिरसाबिभर्ति यश्चार्द्धदेहमददद्गिरिराजपुत्र्यैतंशंकरंशरणदंशरणंव्रजामि १३ येनाबलाजलसमूहवतींसु
पुण्यांगंगांमहोर्मिविषमांगगनात्पतंतीं मूर्द्धाददेस्रजमिवप्रविलोलपुष्पांतंशंकरंशरणदंशरणंव्रजामि १४ कैलासशैलशिखर
प्रविकल्प्यमानकैलासशैलसदृशेनदशाननेन यत्पादपद्मपरिपादनमादधानंतंशंकरंशरणदंशरणंव्रजामि १५ येनासकृद्दितिसु
ताश्चविनाशमीताविद्याधरोरगगणाश्चवरैःसमग्राः संयोजितामुनिवराःफलमूलभक्षास्तंशंकरंशरणदंशरणंव्रजामि १६ एनःकृतो
पिविषयेष्वपिसक्तभावाज्ज्ञानान्वयश्रुतगुणैरपिसुप्रशक्ताः यंसंस्मृताःसुखभुजःपुरुषाभवंतितंशंकरंशरणदंशरणंव्रजामि १७ ४
अग्रेऽमृतस्यरविकोटिसमानतेजाःसंत्रासमनंविबुधदानवसत्तमानां यःकालकूटमपिवत्समुदीर्णवेगंतंशंकरंशरणदंशरणंव्रजामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ ब्रह्मेंद्ररुद्रमरुतांचसषड्मुखानांयोदाद्दरांश्चबहुशोभगवत्प्रजेशः नंदींचमृत्युवदनात्पुनरुज्जहारतंशंकरंशरणदंशरणंव्रजा
मि १९ आराधितःसतपसाहिमवन्निकुंजेधूमव्रतेनमनसापिपरैरगम्यः संजीवनींसमददाद्भृगवेमहात्मातंशंकरंशरणंशरणंव्रजामि
२० नानाविधैर्जगविराडुसमानवक्त्रैर्दक्षाध्वरप्रमथनैर्बलिभिर्गणौघैः योभ्यर्च्यतेमरगणैश्चसलोकपालैस्तंशंकरंशरणदंशरणंव्रजा
मि २१ क्रीडार्थमेवभगवान्भुवनानिसप्तनानानदीविहगपादपमंडितानि सब्रह्मकानिविसृजत्सकृताहितानितंशंकरंशरणदंशर
णंव्रजामि २२ यस्याखिलंजगदिदंवशवर्तिनित्यंयोष्णाभिरेवतनुभिर्भुवनानिभुंक्ते यःकारणंस्कमहतामपिकारणानांतंशंकरंश
रणदंशरणंव्रजामि २३ शंखेंदुकुंदधवलंव्रषभंप्रवीरमारुह्ययःक्षितिधरेंद्रसुतानुयातः यात्यंबरेहिमविभूतिविभूषि तांगंतंशंकरंश
रणदंशरणंव्रजामि २४ स्वेतंमुनिंयमनियोगपरायणैस्तैर्भीमंमहापुरुषकैःप्रतिनीयमानं भक्त्यानतंस्तुतिपरंप्रसभंररक्षतंशंक
रंशरणदंशरणंव्रजामि २५ यःसव्यपादकमलाग्रनखेनदेवःतंपश्चिमंप्रसभमेवपुरःसुराणां ब्राह्मंशिरस्तरुणपद्मनिभंचकर्त्त-
तंशंकरंशरणदंशरणंव्रजामि २६ यस्यप्रणम्यचरणौवरदस्यभक्त्याश्रुत्वाचवाग्भिरमलाभिरतंद्रिताभिः दीप्तैस्तमांसिनुदतेस्वक-
रैर्विवस्वान्तंशंकरंशरणदंशरणंव्रजामि २७ येत्वांस्मरोत्तमगुरुंपुरुषाविमूढाजानंतिनास्यजगतःसचराचरस्य ऐश्वर्यमानविगमानु
शयेनपश्चात्तेयातनांत्वनुभवत्यविशुद्धचेताः २८ तस्यैवंस्तुवतोवाचाशूलपाणिर्वृषध्वजः उवाचवचनंतुष्टोराघवंतुष्टमानसं २९ रुद्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उवाच रामतुष्टोस्मिभद्रंतेजातस्त्वंनिर्मलेकुले त्वंचापिजगतांवंद्योमानुषोदेवरूपधृक् ३० त्वयानाथेनवैदेवाःसुखिनःशाश्वतीः-
समाः एधिष्यंतिचिरंकालंगतेवर्षचतुर्दशे ३१ अयोध्यायामागतंत्वांयेद्रक्ष्यंतिनराभुवि सुखिनस्तेभविष्यंतिस्वर्गवासस्तथाक्षयः ३२
देवकार्यंमहत्कृत्वाआगच्छेथाःपुनःपुरीं राघवस्तुतदादेवंज्ञात्वाशीघ्रंविनिर्गतं ३३ इंद्रमार्गंनदींप्राप्यजटाजूटंनियम्यच निर्गम्यलक्ष्म
णंत्युक्त्वाइदमर्पयमेधनुः ३४ रामवाक्यंतुनतच्छ्रुत्वासीतांवैलक्ष्मणोब्रवीत् किमर्थंदेविरामेणत्यक्तोहंकारणंविना ३५ अपराधंन
जानामिकुपितोयेनप्रेमभुः रामेणाहंपरित्यक्तःप्राणांस्त्यक्ष्याम्यसंशयं ३६ नैवमेजीवितेनार्थोधिङ्मांवैकुलपांसनं आर्यस्ययेनवैम
न्युर्जनितःपापकारिणा कान्वैलोकांगमिष्यामिअपध्यातोमहात्मना उभौहस्तौशिरस्कृत्वासाश्रुकंठोब्रवीदिदं ३८ नापराध्यामिदेवे
शिरामस्यमनसागिरा स्पृष्टौतेचरणौदेविमामेवान्यामतिर्भवेत् ३९ ततोरामब्रवीत्सीतात्यक्तःकिमनुजस्त्वया नैषसंसज्यतेवीरोल
क्ष्मणोलक्ष्मिवर्द्धनः ४० राघवस्त्वब्रवीत्सीतांनाहंत्यक्ष्यामिलक्ष्मणं नकदाचिदपिस्वप्नेलक्ष्मणस्येदृशंप्रियं श्रुतपूर्वंचसुश्रोणिक्षे
त्रस्यास्यविचेष्टितं ४१ अत्रक्षेत्रेजनःसत्यंसर्वोहिस्वार्थतत्परः परस्परंनमन्यंतेस्वार्थनिष्ठैकहेतवः नश्रृण्वंतिपितुःपुत्राःपुत्राणांवा
तथापिता नशिष्योहिगुरोर्वाक्यंशिष्यवाक्यंनवैगुरुः ४३ अथानुबंधनोप्रीतिर्नकश्चित्कस्यचित्प्रियः इत्येवंकथयन्नेवप्रासोरेवाम
हानदीं ४४ चक्रेभिषेकंकाकुत्स्थःसानुजःसहसीतया तर्पयित्वाचसलिलेस्वपितृदेवतामपि ववंदातेमुहुःसूर्यदेवतांचसमाहितः ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृताभिषेकस्तु सराजराजः सीताद्वितीयः सहलक्ष्मणेन कृताभिषेकः सह शैलपुत्र्यागुहेनसार्द्धं भगवान्गणेशः ४५ इत्यादि
महापुराणेपाद्मेमार्कंडेयाश्रमवर्णनंनामाध्यायः १ भीष्मउवाच उक्तंभगवतासर्वपुराणाशयसंयुतम् तथाचैतेनब्रह्मांडगु
रवेप्रतिपादितं १ श्रुत्वैतत् कौतुकंजातंयथातेनास्तिलेहनं कृतंक्षुधापनोदार्थं अन्नदानाद्विनानृप २ तदिहश्रोतुमिच्छामिपृ-
थिव्यांयेचपार्थिवाः अन्नदानाद्दिवंप्रासंकृतवान्श्चान्नमूलकाः ३ कथंतस्यमतिर्नष्टाखेतस्यचमहात्मनः नदत्तंतेपात्रदानंऋ-
षिभिर्वानदर्शितम् ४ अहोमाहात्म्यमन्नस्यइहदत्तस्ययत्फलं परत्रभुज्यतेपुंभिः स्वर्गेश्चाक्षयताव्रजेत् ५ अन्नदानपरंविप्राः
कीर्तयंतिसदोद्यताः अन्नदानात्सुरेंद्रेणत्रैलोक्यमिहभुज्यते ६ शतक्रतुरिहप्रोक्तःसर्वैर्वद्विजोत्तमैः तेनावस्थांतादृशींतुप्राप
वांश्चिदशेश्वरः ७ दानादेवगतःस्वर्गंत्वत्तःसर्वंश्रुतंमया अपरंचेतिहासंमेनिवृत्तंयदिकर्हिचित् ८ भूयोपिश्रोतुमिच्छामितन्मेवद
महामुने ९ पुलस्त्यउवाच एतदाख्यानकंपूर्वंअगस्त्येनमहर्षिणा रामायकथितंराजनन्तत्तेवक्ष्यामिसांप्रतं १० भीष्मउ
वाच कस्मिन्वंशेसमुत्पन्नोराजासौनृपसत्तम यस्यागस्त्येनगदितंचेतिहासंपुरातनं ११ पुलस्त्यउवाच रघुवंशेसमुत्पन्नो-
रामोनाममहाबलः देवकार्यंकृतंतेनलंकायांरावणोहतः १२ पृथिवींराज्यसंस्थाप्यऋषयोभ्यागतागृहे प्राप्तातेतुमहात्मानो-
राघवस्यनिवेशन १३ दृष्ट्वारामंद्वारपालःपूर्णचंद्रमिवोदितं कौशल्यामातभद्रंतेस्फुप्रभाताद्यशर्वरी १४ द्रष्टुमभ्युदयंतेद्यसंप्रा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽ(र)घुनंदन अगस्त्योऋषिभिःसार्द्धंद्वारितिष्टतितेनृप १६ श्रुत्वाप्राप्तान्मुनीन्रामःतान् भास्करसमद्युतीन् प्राहवाक्यंतदाद्वास्थं
प्रा(वे)शयत्वरान्वितः १७ किमर्थंतेत्वयाद्वारेनिरुद्धामुनिसत्तमाः रामवाक्यान्मुनींस्तांस्तुप्रावेशयत्तयथासुखं १८ दृष्ट्वातांतान्मुनीन्प्राप्ता
न्प्र(त्यु)त्थायकृतांजलिः रामोभिवाद्यप्रणतोआसनेषुन्यवेशयत् १८ तेनकांचनचित्रेषुस्वास्तीर्णेषुसुखेषुच कुशोत्तरेषुचासीनाआ
सीने(ऋ)षिसत्तमाः १९ पाद्यमाचमनीयंचदत्वाचार्घ्यंपुरोहितः रामेणकुशलंपृष्टाऋषयःसर्वएवते २० इहसंभाविताःप्रामादिष्टान्
तास्मसांप्रतं दर्शनात्तवराजेंद्रादिष्ट्यापूतास्तपस्विनः २१ रावणस्यवधाच्छत्रोःकृतमस्तु प्रमार्जनं दत्ताचेयंत्वयावीरसर्वस्याभय
दक्षिणा २२ दिष्ट्यावर्षसिकाकुत्स्थजयेनामितविक्रम दृष्टःसंभाषितश्चासियास्यामश्चाश्रमंस्वकं २३ अरण्येविप्रविष्टस्यमया-
वैंद्रंशरासनं अर्पितावक्षयौतूणौकवचंचपरंतप २४ भूयोप्यागमनंकार्यमाश्रमेमेरघूद्वह एवमुक्त्वातुतेसर्वेमुनयोंतर्हिताभ
वन् २५ तेषुतेषुचपुण्येषुरामोधर्मभृतांवर चिंतयामासतत्कार्यंकिंतुमेमुनिनास्तुतं २७ भूयोप्यागमनंकार्यमाश्रमेरघुनंदन
अवश्यमेवगंतव्यमयागस्त्यस्यसान्निधौ श्रोतव्यंदेवगुह्यंतुकार्यमन्यन्नयद्वदेत् एवंचिंतयतस्तस्यरामस्यामिततेजसः २७
करिष्येनियमंधर्मंधर्मोहिपरमागतिः चतुर्वर्षसहस्राणिदशराज्यमकारयत् २८ ददतोजुव्हतश्चैवजग्मुस्तान्येकवर्षवत् प्रजा
पालयतस्तस्यराघवस्यमहात्मनः २९ एकस्मिन्नेवदिवसेवृद्धोजानपदोद्विजः मृतंपुत्रमुपादायराजद्वारमुपागतः ३० रुदंतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विविधावाचः स्नेहाक्षरसमन्वितः दुःकृतंकिंतुमेपुत्रपूर्वदेहांतरेकृतं ३१ त्वामेकंपुत्रंयदहंपश्यामिनिधनंगतं अप्राप्तयौवनंबालंपं
चवर्षेगतोदिवं ३२ अकालेकालमापन्नंदुःखायममपुत्रक अकृत्वापुत्रकार्याणिगतोवैवस्वतक्षयं ३३ रामस्यदुःकृतंव्यक्तंयेन
तेमृत्युरागतः बालवध्याब्रह्मवध्यास्त्रीवध्याचैवराघव ३४ प्रवेक्ष्यातिनसंदेहःसभार्येतुमृतेमयि सुश्रावराघवःसर्वंदुःखशोकस
मन्वितं ३५ निवार्यतंद्विजंरामोवसिष्ठंवाक्यमब्रवीत् किंमयाद्यप्रकर्त्तव्यंकार्यमेवंविधेस्थिते ३६ किंप्राणान्वाजुहोम्यग्नौपर्वता-
द्वापतेमही कथंशुद्धिमहंयामिश्रुत्वाब्राह्मणभाषितम् ३७ वसिष्ठस्त्वाग्रतःस्थित्वाराज्ञोदीनस्यनारदः प्रत्युवाचमुनिर्वाक्यंऋषी
णांसन्निधौतदा ३८ शृणुरामयथाकालंप्राप्तोयंबालसंक्षयः पुराकृतयुगेरामराद्धतोब्राह्मणोत्तरं ३९ अब्राह्मणोनवैकश्चित्तप-
स्तपतिराघव अमृत्यवस्तदासर्वेजायंतेचिरजीविनः त्रेतायुगेपुनःप्राप्तेब्रह्मक्षत्रमनंतरं अधर्ममपरेतेषांवैश्याःशूद्रास्तथाशिवं
४० एवंनिरंतरेयेषांतद्भूतमनृतंपुनः अधर्मस्यत्रयःपादाएकोधर्मस्यवागतः ४१ ततःसर्वेभृशंत्रस्तावर्णाब्राह्मणपूर्वकाः भूयःपाद
स्त्वधर्मस्यद्वितीयःसमपद्यत ४२ तस्मिन्द्वापरसंज्ञेतुतपोवैश्यंसमाविशत् युगत्रयस्यवैधर्म्मंधर्मस्यप्रातितिष्ठतः ४३ नशूद्रोलभ
तेकर्त्तुतपउग्रंनरर्षभ भविताशूद्रयोन्यांतुतपःचर्याकलौयुगे ४४ सतेविषयपर्यंतेराजन्नुग्रतरंतपः शूद्रस्तपतिदुर्बुद्धिस्तेनबा-
लवधंकृतं ४५ योत्वधर्ममकार्यंवाविषयेपार्थिवस्यहि कुरुतेराजशार्दूलपुरेवादुर्मतिर्नरः ४६ क्षिप्रंसनरकंयातिसचराजानसंश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प. पु.
७

यः चतुर्थंतस्यपापस्यभागमश्नातिपार्थिवः ४७ सत्वंपुरुषशार्दूलगच्छस्वविषयंस्वकं दुःकृतंयत्रपश्येथास्तत्रयत्नंसमाचर ४८
एषतेधर्मवृद्धिश्चबालायुर्वर्द्धनंतथा भविष्यतिनरश्रेष्ठबालस्यास्यचजीवनं ४९ प्रहर्षमतुलंलेभेलक्ष्मणंचेदमब्रवीत् गच्छसौम्यद्विज
श्रेष्ठंसमाश्वासयलक्ष्मण बालस्यचशरीरंत्वंतैलद्रोण्यांनिधापय गंधैश्चपरमोदारैस्तैलस्यचसुगंधिनः ५१ यथानशीर्यतेबाल स्त-
थासौम्यविधीयतां यथाशरीरंगुप्तंस्याद्बालस्याद्दुष्टकर्मणः ५२ पिबंतिपरमेदेवानभवेत्तत्तथाकुरु तथासंदिश्यसौमित्रिंलक्ष्मणं
शुभलक्षणं ५३ मनसापुष्पकंध्यात्वात्वमागच्छेर्महायशाः इंगितंतत्तुविज्ञायकामगंहेमभूषितं ५४ आजगाममुहूर्त्तेनसमीपंराघव
स्यतु सोब्रवीत्प्रांजलिर्वाक्यमयमस्मिनराधिप ५५ वशेतवमहाबाहोकिंकरःसमुपस्थितः भाषितंसुचिरंश्रुत्वापुष्पकस्यनराधिपः
५६ अभिवाद्यमहर्षिंतंविमानंसोध्यरोहत धनुर्गृहीत्वातूणीचखड्गंचापिमहाप्रभं ५७ निक्षिप्यनगरेवीरौसौमित्रिभरतावुभौ ययौप्र
तीचींत्वरितोविचिन्वन्सुसमाहितः ५८ उत्तरामगमच्चापिदिशांहिमवदाश्रितां पूर्वामपिदिशांगत्वातथापश्यन्नराधिप ५९ सर्वान्
शुद्धसमाचारानादर्शमिवनिर्मलान् ततोदिशमसौक्रामद्दक्षिणांरघुनंदनः ६० पौलस्त्यसुत्तरेपार्श्वेददर्शसुमहामनाः तस्मिन्सरसि
तप्यंतंतापसंसुमहत्तपः ६१ ददर्शराघवोभीमंलंबमानमधोमुखं तमुपागम्यकाकुत्स्थस्तप्यमानंतुतापसं ६२ उवाचराघवोवाक्यंधन्य
स्त्वममरप्रभ कस्यांयोनौतपोवृद्धिंवर्त्ततेत्वद्दिनिश्चयः ६३ अहंदाशरथीरामपृच्छामस्त्वांकुतूहलात् कोर्थोव्यवसितस्तुभ्यंस्वर्गलोकपरि-

रा. व.
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रहं ६४ किमर्थंतपसेवात्वंश्रोतुमिच्छामितापस ब्राह्मणोवासिभद्रंतेक्षत्रियोप्यथदुर्जयः ६५ वैश्यस्तृतीयवर्णोवाशूद्रोवासत्यमुच्य
तां ततःसत्यात्मकंनित्यंस्वर्गलोकपरिग्रहे ६६ सात्विकंराजसंचैवतच्चशक्त्यात्मकंतपः जगदुपकारहेतोस्तुसृष्टश्चैवविरिंचिना ६७
रौद्रंक्षत्रियतेजस्तुतच्चराजन्यमुच्यते परस्योत्सादनार्थायतच्चासुरमुदाहृतम् ६८ अहानिहुनतेयोवैअसृग्दिव्यानिभागशः यश्चाग्निं
साधयेद्वापिसिद्धिंवामृत्युरेववा ६९ आसुरोत्येषतेभावःनचमेत्वंद्विजोमतः सत्यंनाधर्मतःसिद्धिरमृतेनास्तिजीवितं ७० तस्यतद्
वचनंश्रुत्वारामस्याक्लिष्टकर्मणः अवाक्शिरास्तथाभूतोवाक्यमेतदुवाचह ७१ स्वागतंतेनृपश्रेष्ठचिराद्दृष्टोसिराघव पितृभूतोस्मिते
वत्सबंधुभूतोस्मितेनघ ७२ अथवानेतदेवंहिसर्वेषांनृपतिःपिता सत्वमर्घार्होसिराजन्वयंतेविषयेतपः ७३ चरामस्त्वभागोस्ति
पूर्वसृष्टःस्वयंभुवा सधन्यास्मवयंरामधन्यस्त्वमसिपार्थिव ७४ यस्यतेविषयेत्वेवंसिद्धिमिच्छंतितापसाः तपसात्वंमदीयेनसिद्धिंप्रा
प्नुहिराघव ७५ यदेतद्भवताप्रोक्तंयोनौकस्यांतुतेतपः शूद्रयोन्यांप्रसूतोहंतपउग्रंसमास्थितः ७६ देवत्वंप्रार्थयेरामस्वशरीरेण
राघव नमिथ्याहंवदेवत्सदेवलोकचिकीर्षया ७७ शूद्रंमांविद्धिकाकुत्स्थशंबुकंनामनामतः भाषतस्तस्यकाकुत्स्थखड्गंरूरुचि
रप्रभं ७८ निष्कृष्यकोशाद्विमलंशिरश्चिच्छेदराघवः तस्मिन्शूद्रेहतेदेवाःसेंद्राःब्रह्मपुरोगमाः ७९ साधुसाध्वितिकाकुत्स्थंप्रशशंसु-
र्मुहुर्मुहुः पुष्पवृष्टिश्चमहतीदिव्यानांसुसुगंधिनां ८० आकाशाद्वायुमुक्तानांराघवंसर्वतोकिरन् सुप्रीताश्चब्रुवंदेवारामंवाक्यविदां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरं ८१ सुरकार्यमिदंसौम्यकृतंतेरघुनंदन गृह्णाणचवरंरामयमिछसिमहाव्रत ८२ उवाचप्रांजलिर्वाक्यंसहस्राक्षंपुरंदरं यदिदेवाःप्रस
न्नामेवराहोंयदिवाप्यहं ८३ कर्मणामेयदिप्रीताद्विजपुत्रःसजीवतु वरमेतद्विभवतांकांक्षितंपरमंहिमे ८४ ममापचाराद्वालोसौब्राह्म
णस्यैकपुत्रकः अप्राप्तकालःकालेननीतोवैवस्वतक्षयं ८५ मदीयेनायुषेनालंप्रदेनार्द्धेनवासुराः जीवाप्यतांवरोमह्यंबरकोट्यधिकोव
रः ८६ ससंजीवतुभद्रंवोनानृतीस्यान्महंसुराः द्विजस्यसंसृतोत्यर्थेजीवयिष्यामितंसुतं ८७ राघवस्यवचःश्रुत्वासर्वेतेविबुधोत्तमाः
प्रत्यूचुस्तेमहात्मानंप्रीताःप्रीतिसमन्विताः ८८ निवृत्तोभवकाकुत्स्थब्राह्मणस्यैकपुत्रकः जीवितंप्राप्तवान्भूयःसमेतश्चाप्तबंधुभिः ८९
यस्मिन्मुहूर्त्तेकाकुत्स्थभूद्रोयंविनिपातितः तस्मिन्मुहूर्त्तेसोजीवन्बालःकौसलनंदन ९० आरोहयविमानंतंपुष्पकंहेमभूषितं ९१ इ
तिश्रीपद्मपुराणेशूद्रवधोनामाध्यायः २ पुलस्त्यउवाच ततोदेवाःप्रयातास्तेविमानैर्बहुभिस्तदा रामोप्यनुजगामाशुकुंभयोनिं
तपोनिधिं १ अहंभगवतातेनभूयोप्यागमनंकृथाः एवमुक्तोययावाथसभाजितसमागतः २ तदहंदेवतादेशात्स्वकायार्थेमहामु-
निं पश्यामितंमुनिंगत्वादेवदानवपूजितं ३ उपदेशंतुमेतुष्टःस्वयंदास्यातिसत्तमः दुःखीयेनपुनर्मर्त्येनभवामिकदाचन ४ पितादश
रथोमह्यंकौशल्याजननीतथा सूर्यवंशसमुत्पन्नस्तथाप्येवंसुदुःखितः ५ राज्यकालेवनेवासःसभार्यस्यानुजेनच हरणंचापिभा
र्यायारावणेनकृतंमम असहायेनतुमयातीर्त्वासागरमुत्तमं ७ रुद्धांतुतांपुरींसर्वांकृत्वातस्यकुलक्षयं दृष्ट्वासीतामयात्यक्तादेवीदेवी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुरास्तथा ८ आगत्यमांतथोनुस्तेयथासीतामयागृहं आनीतावैप्रीतिमनालोकवाक्याद्विसर्जिता ९ वनेवसानिसादेवीपुरेचाहंवसा
मिवै जातोहमुत्तमेवंशेउत्तमोहंधनुष्मतां १० सइमंदुःखमापन्नोयस्यचेतोनविद्यते देववाक्याच्चमेभूयोप्राणिमेत्वद्दिसंस्थितः ११ पश्या
मितंमुनिंवंद्यंजगतोस्यहितेरतं दृष्टेनमेयथादुःखंनाशमेष्यातिसत्वरम् उदयेनसहस्रांशोर्हिमंयद्वद्विलीयते १४ तन्मेदुःखस्यसंघातः
सर्वथानाशमेष्यति दृष्ट्वाचदेवान्संप्राप्तान्अगस्त्योभगवानृषिः १५ अर्घमादायसुप्रीतान्सर्वास्तानभ्यपूजयत् १६ तेपिगृह्यततः
पूजांसंभाष्यचमहामुनिं जग्मुस्तेत्रिदशाद्दृष्टानाकपृष्ठंमुदान्विताः १७ गतेषुतेषुकाकुत्स्थःपुष्पकादवरुह्यच अभिवादयितुंचक्रेसो
गस्त्यमृषिसत्तमं १८ रामउवाच सुतोदशरथस्याहंभवंतमभिवादितं आगतोवैमुनिश्रेष्ठसौम्येनेक्षस्वचक्षुषा १९ निर्धूतपापस्त्वां
दृष्ट्वाभवानीहनसंशयः एतावदुक्त्वासमुनिमभिवाद्यपुनःपुनः २० कुशलंशिष्यवर्गस्यमृगाणांचवनस्यच भगवद्दर्शनाकांक्षीहत्वा-
भूद्रमिहागतः २१ अगस्त्यउवाच स्वागतंतेरघुश्रेष्ठजगद्वंद्यसनातन दर्शनात्तवकाकुत्स्थपूतोहंमुनिभिःसह २२ त्वमृषेराजशा
र्दूलगृहाणार्घ्यंमहाद्युते स्वागतंतेनरश्रेष्ठदिष्ट्याप्राप्तोसिमानद २३ त्वंहिनित्यंबहुमतोगुणैर्बहुभिरुत्तमैः अतस्त्वंपूजनीयश्चम-
मनित्यंत्वद्दिस्थितः २४ सुराहिकथयंतित्वांभूद्रघातिनमागतं ब्राह्मणस्यचधर्मेणत्वयावैजीवितःपुनः २५ उष्यतांचैकरजनीसका
शेममराघव लब्धस्यहिपुनर्दानंसुमहत्फलमुच्यते २६ त्वंहिशक्तःपरित्रातुंसेंद्रानपिसुरोत्तमान् तस्मान्प्रदास्येविधिवत्प्रतीच्छ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प० स्वनरर्षभ २७ अथोवाचमहाबाहुरिक्ष्वाकूणांमहारथः कृतांजलिंमुनिश्रेष्टंसर्वधर्ममनुत्तमं २८ प्रतिगृहोवैभगवन् तवब्रह्माविगर्हि पु०
९ तः क्षत्रियेणकथंविप्रप्रतिग्राह्योविजानता २९ ब्राह्मणेनयथादत्तंतन्मेत्वंवक्तुमर्हसि नगृहीपुत्रवानस्मिनाश्रमस्थोमहामुने ३०
आ[illegible]दानचकष्टंमेकथंगृण्हेप्रतिग्रहं भार्यामेसुचिरंनष्टानचान्याममविद्यते ३१ केवलंदोषभागेवभवामीहनसंशयः कष्टांचसदशां
प्राप्यक्षत्रियोपिप्रतिग्रहं ३२ कुर्वन्नदोषमाप्नोतिनतुवैपात्रकारणं वृद्धौचमातापितरौसाध्वीभार्याशिशुःसुतः अप्यकार्यशतंकृत्वा
भर्तव्यामनुरब्रवीत् ३५ नाहंगृहीष्येब्रह्मर्षेत्वयादत्तंप्रतिग्रहं नतन्मेभवताकोपःकार्योवैसुरपूजित ३६ अगस्त्यउवाच अप्रति
ग्रहदोषेणगृह्यतेपार्थिवानृप भवान्वैतारणेशक्तस्त्रैलोक्यस्यापिराघव ३८ एकंवैब्राह्मणाद्रामविशेषेणतपस्विनं तस्मात्प्रदा-
स्येविधिवत्प्रतीक्षस्वनराधिप ३९ रामउवाच क्षत्रियेणकथंविप्रप्रतिग्राह्योद्विजन्मनः ब्राह्मणेनयथादत्तंतन्मेत्वंवक्तुमर्हसि
४० अगस्त्यउवाच आसीत्कृतयुगेरामब्रह्मभूतेपुरातने अपार्थिवाःप्रजाःसर्वास्सुराणांतुशतक्रतुः ४१ दैत्यमस्मासुलोकेशपार्थि
वंसुरपुंगव यस्मिन्प्रजाप्रयुंजानाःपुरुषेवर्द्धतेमही ४२ ततोब्रह्मासुरश्रेष्ठोलोकपालान्सवासवान् समाहूयाब्रवीत्सर्वान्तेजोभा
गोत्रयुज्यतां ४३ ततोददुर्लोकपालाश्चतुर्भागंस्वतेजसः अक्षयश्चततोब्रह्मायतोजातोक्षयोनृपः ४५ तंब्रह्मालोकपालानांसमां- ९
शंसमयोजयत् ततोनृपस्तदातासांप्रजानांक्षेमपीडितः ४५ अत्रेर्द्रेणतुभागेनसर्वान्साज्ञापयन्नृप वारुणेनचभागेनहृष्टीःपुष्णाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहिनः ४६ कौबेरेणेचसांशेन अर्थंददातियाचते यस्तुयाम्योद्भवोभागस्तेनशासतिवैप्रजाः ४७ तदिंद्रेणनरेंद्रस्तुभागेनरघुनंदन
प्रतिगृण्हीष्वाभरणंतारणार्थममप्रभो ४८ तंरामःप्रतिजग्राहसुनिहस्तान्महात्मनः दिव्यमाभरणंचित्रंप्रदीप्तमिवभास्करं ४९ प्रतिगृ
ह्य ततोगस्त्याद्राघवःपरवीरहा निरीक्ष्यसुचिरंकालंविचार्यचपुनःपुनः ५० मौक्तिकानिविचित्राणिधात्रीफलसमानिच जांबूनद
निबद्धानिवज्रविद्रुमनीलकैः ५१ पद्मरागसगोमेदैर्वैदूर्यपुष्परागकैः सुनिबद्धंसुविभक्तंसुकृतंविश्वकर्मणा ५२ दृष्ट्वाप्रीतिसमायु-
तोभूयश्चेदंविचिंतयत् ईदृशानिचरत्नानिमयादृष्टानिकानिचित् ५३ उपशोभानिबद्धानिपृथ्वीमूल्यसमानिच विभीषणस्यलं-
कांनदृष्टानिमयापुरा ५४ इतिसंचिंत्यमनसाराघवस्तमृषिंततः आगमंतस्यदिव्यस्यप्रष्टुंसमुपचक्रमे ५५ अत्यद्भुतमिदंब्रह्म
...चमहीक्षितान् कथंभगवताप्राप्तंकृत्वावाकेननिर्मितं कुतूहलकृतेनैवपृष्टामित्वांमहामुने करतलेस्थितंरत्नंकरमध्यंमका-
...७ अधमंतंविजानीयात्सर्वशास्त्रेषुगर्हितं दिशःप्रकाशंतेयस्तुमध्यंतुमुनिसत्तम ५८ ऊर्ध्वगांत्रिशिखंतत्तुउत्तमंतद्भुदाहृ
तान्युत्तमजातीनिऋषिभिःकथितानिच ५९ आश्चर्याणांचबहुनांदिव्यानांभगवान्निधिः एवंवदतिकाकुत्स्थेमुनिर्वाक्यमथा-
ब्रवीत् ६० अगस्त्यउवाच शृणुरामयथावृत्तंपुरात्रेतायुगेमहत् द्वापरेसमनुप्राप्तेवनेयदृष्टवानहं ६१ आश्चर्यंसुमहाबाहोम-
हाधस्तिकेवलं पुरात्रेतायुगेत्वासीदरण्यंबहुविस्तरं ६२ समंताद्योजनकृतंमृगपक्षीविवर्जितं तस्मिन्निःपुरुषेरम्येकुर्वाण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्तमं अहमाक्रमितुंसौम्यतद्‌रण्यमुपागतः तस्यारण्यस्यरूपंतुनिर्देष्टुंवास्तिकःप्रभुः ६३ फलमूलैस्तथाशाकैर्बहुरूपैश्चकां
ः तस्यारण्यस्यमध्येतुसरोयोजनमायतम् ६४ हंसकारंडवाकीर्णंचक्रवाकोपशोभितं तत्रैश्वर्यंमयादृष्टंनिःसत्वंचेहमुत्तमम्
सरस्यभ्यचरन्नेकोबहुपक्षिगणावृतम् समीपेतस्यसरसोददर्शाहंगृहात्समं ६६ पुराणंपुण्यमत्यर्थंतपस्विजनवर्जितं तत्राहं
रात्रिंनैदाघींपुरुषर्षभ ६७ प्रभातेपुनरुत्थायसरस्तमुपचक्रमे अथापश्यत्मह छावस्रुपुष्टमजरंक्वचित् ६८ तिष्ठंतंपरया
सरसोनातिदूरतः तदर्थंचिंतयानोहंमुहूर्तमिवराघव ६९ तिष्टतस्तुशरीरस्यकिमिदंत्विति चिंतयन् अशरण्येवनेतास्मि
कमहत्सरः ७० अस्यतीरेगतःप्राणःकोप्ययंषपुरुषर्षभः मुनिर्वापार्थिवोवापिकोमुनिःपार्थिवोप्ययं ७१ अथवापार्थिव-
प्यापिवनेवैसभवःकुतः अतीतेह्निरात्रौवाप्रातर्वाम्रियतेयदि ७२ पदंदृष्टंनचान्यस्यमयात्रभ्रमतावने कएषवैकथंमृत्युः
कथंप्राप्तोमहावनं ७३ अवश्यंतुमयाज्ञेयःसर्वस्यास्यविनिश्चयः यावदेवंस्थितश्चाहंचिंतयानोरघुत्तम अथापश्यन्मुहूर्त्तात्तुदि
व्यमद्भुतदर्शनं विमानंपरमोदारंहंसयुक्तंमनोजवं ७५ तत्रोपरिसहस्रंतुविमानेप्सरसांनृप वपुष्मतीनांतत्संस्थंरमयंतिचत-
न्नरं ७६ गांतिदेव्यानिगेयानिवादयंतितथापराः अथापश्यंन्नरस्तस्माद्विमानादवरुत्यतु ७७ स्वमांसंभक्षमाणंतंनररघु
कुलोद्वह ततोभुक्त्वायथाकामंसमांसंबहुपीवरं ७८ अवतीर्यसरःशीघ्रंदृष्ट्वारोहद्दिवंपुनः तमहंदेवसंकाशमारोहंतंश्रियान्वितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७९ भोभोस्वर्गिन्महाभागपृछामित्वांकथंत्विदं जुगुप्सितंतवाचारंगतिस्त्वेततवोत्तमा ८० यदिगुह्यंनतावैत्ते कथंवास्मद्विधोभवेत् का
मतःश्रोतुमिछामिकिमेतत्परमंवच ८१ भोभवान्देवसंकाशआहारस्तुविगर्हितः त्वयातुभुज्यतेसौम्यकिमर्थंकुचवर्त्तसे ८२ कश्चाय-
मीश्वरोभावोभास्करोदेवनिर्मितः आहारोयस्यतेवीरश्रोतुमिछामितत्वतः ८३ श्रुत्वातुभाषितंवाक्यंमनोरमशुभाक्षरं प्रांजलिःप्र-
त्युवाचेदंसस्वर्गीरघुनंदन ८४ शृणुमेद्यथावृत्तंममेदंसुखदुःखजं धर्मोहिदुरतिक्रम्योशृणुयत्पृछसेद्विज ८५ पुरावैदर्भकोरा-
जापितामममहायशाः वसुदेवइतिख्यातःशृणुलोकेषुधार्मिकः ८६ तस्यपुत्रद्वयंब्रह्मन्द्वाभ्यांस्त्रीभ्यामजायत अहंश्वेतइतिख्या
तोयान्सुरथोभवत् ८७ ततःपितर्युपरतेमांपौराअभ्यषेचयत् तत्राहंकारयेद्राज्यंधर्मेणसुसमाहितः ८८ एवंवर्षसहस्रा-
णिसमुपाव्रजन् राज्यंकारयतेमत्यंप्रजाश्वपरिपालयन् ८९ सोहंनिमित्तेकस्मिंश्चित्द्विजार्थेचौद्विजोत्तमः मरणंहृदये
तपोवनमुपागमत् ९० सोहंवनमिदंप्राप्यभृशंपक्षिविवर्जितं प्रविष्टस्तपआस्थातुंतस्यैवसरसोंतिके ९१ राज्येभिषिच्यसु
विहरंतंमहारथं इदंसरसमाश्रित्यतपस्तप्तंसुदारुणं ९२ सोहंवर्षसहस्राणिअशीतिस्तप्तवान्वने शुभंतुभुवनंप्राप्तोब्रह्मलो
कमनुत्तमं स्वर्गस्थस्यचमेब्रह्मन्क्षुत्पिपासेद्विजोत्तम अवाधत्तांभृशंचाहंअभवन्व्यथितेंद्रियः ९४ ततस्त्रिभुवनश्रेष्टमवोचस्त्व-
मामहं भगवन्सर्वलोकोयंक्षुत्पिपासविवर्जितः ९५ कस्येयंकर्मणःप्राप्तिःक्षुत्पिपासायुतोभवं आहारःकश्चमेदेवब्रूहित्वंप्रपितामह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९ ततःपितामहःप्राहचिरंध्यात्वामहामुने मामुवाचतदावाक्यंनास्तिभोज्यस्वदेहजं ऋतेस्वानीतमांसानितानिभक्षयनित्यशः
शरीरंहितेपुष्टंकुर्वंतातपउत्तमं ९८ नादत्तंजायतेम्वेतत्किंचिदत्रमहीतले अपिचेद्वक्षमाणायाभिक्षापिप्राणिनेपुरा ९९ नहिदत्ताम
भमोहादतिथयेनदा तेनस्वर्गगतस्यापिक्षुत्पिपासेनवाधुना १०० सत्वंस्वपुष्टमाहारैःस्वशरीरमनुत्तमं भक्षयस्वचराजेंद्रसातेतृ
ष्यति १ एवमुक्तेनतोदध्यौब्रह्माणमहमुक्तवान् भक्षितेचस्वकेदेहेपुनरन्यश्चमेविभो २ क्षुधानिवारणंदेवदेहस्यास्यवि-
इदमेवाक्षयंदेवतृप्तिर्मेजायतेयथा ३ ततोब्रवीत्पुनर्ब्रह्मादेहस्तेवक्षयःकृतः भक्षयित्वामृतरसंसातेतृप्तिर्भविष्यति ४
दनेतुविभ्राग्यातवश्वेतभविष्यति यावद्वर्षशतंपूर्णस्वमांसस्वादनोनृप ५ यदात्वगस्त्यस्तेश्वेतकाननंसुमहत्तरं आगमिष्य
दुर्द्धर्षनदाकृच्छ्राद्विमोक्षसे ६ सहितारयितुंशक्तःसेंद्रानपिसुरासुरान् आहारंकुत्सितंचेदंराजर्षेकिंपुनस्तव ७ सुरकार्येमहत्तेन
ुष्करस्थमहात्मना उदधिर्निर्जलंकृत्वादानवाश्चविनाशिनाः ८ विंध्यश्चादित्यविद्वेषाद्वर्द्धमानोनिवारितः नममानामहीचैषागुरुत्वे
नाविलंबिता ९ दक्षिणादिगियंजातात्रैलोक्यविषमास्थितं मयागत्वास्फरैःसार्द्धंप्रेषितोदक्षिणांदिशं १० समांकुरुमहाभागगुरुत्वे
चजगत्समं एवंचतेनमुनिनास्थित्वासर्वाधरासमा ११ कृत्वाराजेंद्रमुनिनाएवमत्रापिदृश्यते सोहंभगवतःश्रुत्वादेवदेवस्यभाषितं
१२ भुंजतावनृसमाहारंस्वशरीरमनुत्तमं पूर्णवर्षशतंचाद्यभोजनंकुत्सितंचमे १३ क्षयंनाभ्येतितद्विप्रतृप्तिश्चापिममोत्तमा तंमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निंकृच्छ्रसंतमश्चिंतयानोदिवानिशं १४ कदावैदर्शनंमत्त्यांसमुनिर्दास्यतेमुने एवंमेचिंतयानस्यगतंवर्षशतंत्विह १५ सोगस्त्यस्त्वंहिभ
वन्मुनिर्मेभविताध्रुवं नान्यथाभवतेब्रह्मन्कुंभयोनिमृतेत्वयं श्रुत्वेत्यंभाषितंरामदृष्ट्वाहारंचकुत्सितं कृपयापरयायुक्तस्तंपरंस्वर्ग
सिनं १७ करोम्येनंस्कधाभोक्त्तंनाशयिष्यामिकुत्सितं भूयोपितंनृपंवाक्यमगस्त्यःकिंकरिष्यति १८ अहमेतंकुत्सितंतंतेदास्याम्या
द्यवै ईप्सितंसर्वमन्यच्चयत्तेप्रीतिकरंमतं १९ सस्वर्गीमांतदाप्राहकथंब्रह्मन्वचोन्यथा कर्त्तुंसुनेमयाशक्यंनचान्यस्तारयिष्यति
विकरकयोनिंतंमित्रावरुणसंभवं आपृष्टोसिमयाब्रह्मन्गमिष्येतुपितामहं २१ एवंब्रुवाणंतंस्वेतमुक्तवानहंसास्मितं आगतस्त्त
रेनतारयिष्येनसंशयः २२ ततःस्वर्गीतुमांज्ञात्वादंडवत्पतितोग्रतः तमुत्थाप्य तदाराममब्रुवंकिंकरोम्यहं २३ राजोवाच
कुत्सिताद्ब्रह्मन्तारयस्वाद्यकुत्सितं येनलोकाक्षयास्वर्गेभवंतित्वत्कृतामुने २४ प्रतिप्रातिग्रहंदत्तंजगद्वंद्यनमोस्तुते भवान्मा
तुप्रतीछतुप्रतिग्रहं २५ इदमाभरणंसौम्यतारणार्थंद्विजोत्तम ब्रह्मर्षेप्रतिगृण्हीष्वप्रसादंकर्त्तुमर्हसि २६ इहगावःसुवर्ण-
ः समनुत्तमं भक्ष्यभोज्यंचविप्रर्षेद्द्यामाभरणंतव २७ सर्वान्कामान्प्रयछामिसर्वान्भोगांश्चतेद्विज तारणेतुभवान्म-
ादंकर्त्तुमर्हसि तस्याहंस्वर्गिणोवाक्यंश्रुत्वादुःखसमन्वितं तारणायमतिंकृत्वानलोभाद्रघुनंदन २९ गृहीतेभूषणेराममम
तेतदा मानुषःपौर्वकोदेहोसराज्ञस्तस्यनश्यत ३० प्रनष्टेनशरीरेणराजर्षिःपरयामुदा मयोक्तेसोविमानेनजगामत्रिदिवंपु-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ तेनमेशक्रतुल्येनदत्तमाभरणंशुभं तस्मिन्निमित्तेकाकुत्स्थदत्तमद्भुतकर्मणा श्वेतोविदर्भकोराजातदाभूद्धूतकल्मषः ३२ रा०च०
इतिश्रीपद्ममहापुराणेपाद्मेरामागस्त्यसंवादोनामाध्यायः पुलस्त्यउवाच तदद्भुततमंवाक्यंश्रुत्वागस्त्यस्यराघवः गौरवाद्विस्मया
...यःप्रष्टुंप्रचक्रमे १ रामउवाच भगवंस्तद्वनंघोरंयत्रासौदत्तवांस्तव श्वेतोवैदर्भकोराजातदद्भुतमभूत्कथं २ विषयंतद्वनंराजा
...विवर्जितं प्रविष्टस्तमवस्थांतुकथंवदमहामुने ३ समंताद्योजनशतंनिर्मनुष्यमभूत्कथं भवान्कथंप्रविष्टोसियेनकार्येणतद्वद
...यउवाच पुराकृतयुगेराजन्मनुर्दंडधरःप्रभुः तस्यपुत्रोथनाम्नासीदिक्ष्वाकूरुचिरद्युतिः ५ तंपुत्रंपूर्वजंराज्येनिक्षिप्यप्रभु
...र्मतं पृथिव्यांराजवंशानांभवराज्येतुवाचह ६ तथेतिचप्रतिज्ञातंपितुःपुत्रेणराघव ततःपरमसंहृष्टःपुनस्तंप्रत्यभाषत ७ प्री
...स्मिपरमोदारकर्मणात्तेनसंशयः दंडेनचप्रजारक्षनचदंडमकारणं ८ अपराधिषुयोदंडःपात्यतेमानवैरिह सदंडोविधिवन्मुक्तः
...र्नियतिपार्थिवं ९ तस्माद्दंडेमहाबाहोयत्नकोभवपुत्रक धर्मस्तेपरमोलोकेकृतएवंभविष्यति १० इतितंबहुसंदिश्यमनुःपुत्रं
...माधिना जगामत्रिदिवंहृष्टोब्रह्मलोकमनुत्तमं ११ जनयिष्येकथंपुत्रानितिचिंतापरोभवत् कर्मभिर्बहुरूपैस्तुतैस्तैर्मनुसुतोभ
...न् १२ तोषयामासपुत्रेणसतुदेवसुतोपमः सर्वेषामुत्तमस्तेषांकनीयान्रघुनंदन १३ पुण्यश्चकृतविद्यश्चगुरुस्वजनपूजया ना० १२
...तस्यचदंडेतिपिताचक्रेसबुद्धिमान् १४ भविष्येदंडपतनंशरीरेतस्यपश्यतः सपश्यमानस्तंदोषंघोरंपुत्रस्यराघव विंध्यस्यशृंग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ोर्मध्येपुरमस्यददौप्रभुः सदंडस्तत्रराजाभूद्रम्येपर्वतमूर्द्धनि १६ पुरंचाप्रतिमंतेननिवेशायतथाकृतं नामतस्यपुरस्याथमधुमत्त
तिस्वयं १७ तथादोषेणसंपन्नःसूरोवासमथाकरोत् एवंसराजातद्राज्यंचकारसपुरोहितः १८ प्रहृष्टमनुजाकीर्णदेवराजोयथा-
वि ततःसदंडःकाकुत्स्थबहुवर्षगणायुतान् १९ अकारयतधर्मात्माराज्यंनिहतकंटकं अथकालेनकस्मिंश्चिद्राजाभार्गवमाश्रमं २०
ीयमुपाक्रामच्चैत्रमासेमनोरमे तत्रभार्गवकन्यातुरूपेणाप्रतिमाभुवि २१ विचरंतीवनोद्देशेदंडोपश्यदनुत्तमां उत्तुंगपीवरीश्या
द्विंबसमाननां २२ सदृष्ट्वाचारुसर्वांगींपीनोन्नतपयोधरां मध्येक्षामांचविस्तीर्णांदृष्ट्वायाकुरुतेमुदं २३ एकवस्त्रांवनेचैकांप्र-
ीवनेस्थितां सतांदृष्ट्वातुरीराजाअनंगशरपीडितः २४ अभिगम्यसवैराजाकन्यांवचनमब्रवीत् कुतस्त्वमसिसुश्रोणिकस्यवा
भने २५ पीडितोहमनंगेनपृच्छामित्वांस्फशोभने ममत्वयाह्रतंचित्तंदर्शनादेवसुंदरि २६ इदंवयस्तेप्रार्थितंमुनीनांचित्तहार
नलभेभोक्तुंमृतंमामुपधारय २७ त्वयापन्नाममप्राणामांजीवयसुलोचने दासोस्मितेवरारोहेभक्तंमांभजसुंदरी २८ त
ब्रुवाणस्यमदोन्मत्तस्यकामतः भार्गवीप्रत्युवाचेदंवचःसानुनयंनृप २९ मांभार्गवस्कतांविद्धिशुक्रस्याक्लिष्टकर्मणः अरजां
जेंद्रज्येष्ठामाश्रमवासिनः ३० शुक्रःपितामेराजेंद्रत्वंचशिष्योमहात्मनः धर्मेणभगिनीतेहंभवामिनृपसत्तम ३१ एवंविधिं
क्तुंनत्वमर्हसिपार्थिव अन्येभ्योपिसुदुष्टेभ्योरक्ष्याहंचसदात्वया ३२ क्रोधनोमेपितारौद्रोभस्मत्वंचसमानयेत् अथवाराज्ञ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

…बंधंकुरुषेबलात् ३३ पितरंमेयाचयस्व धर्मदृष्टेनकर्मणा वरयस्वनृपश्रेष्ठपितरंमेमहाद्युते ३४ अन्यथाविपुलंदुःखंभवे
…भिसंवृतं क्रुद्धोहिमेपितासर्वंत्रैलोक्यमपिनिर्दहेत् ३५ ततस्तुतंमहाघोरंस्मृत्वादंडुंस्फदारुणं प्रत्युवाचमदोन्मत्तःशिरसाभि
…ः ३६ प्रसादंकुरुरूश्रोणिकालोन्मत्तस्यभामिनि त्वयारुद्धाममप्राणाविशीर्यंतेशुभानने ३७ त्वांप्राप्यवावधोमेस्तुव-
…महत्तरं भक्तंभजस्वमांभीरुभक्तोहंत्वयिसुंदरी ३८ एवमुक्त्वातुतांकन्यांबलात्संगृह्यबाहुना अतीतेवाक्पथेतेनवि
…थाकृता ३९ दृढमंगेसमाश्लिष्टासुरवंचैवमुखेकृतं विस्फुरंतीयथाप्राणंमैथुनायोपचक्रमे ४० तमनर्थंमहाघोरंदंडः
…सुदारुणं नगरंस्वंजगामाशुमधुमंतमनुत्तमं भार्गवीरुदतीदीनाप्राप्यमस्याविदूरतः प्रत्यपालयदुद्विग्नापितरंदेवसम्मि
…ं समुहूर्त्तादुपस्पृश्यदेवर्षिरमितप्रभः स्वमाश्रमंशिष्यवृतःक्षुधार्तःसन्न्यवर्तत ४३ सोपश्यदरजांदीनांरजसासमभिष्टु
…भपस्यसंयुक्तांज्योत्स्नामिवग्रहरंजितां ४४ तस्यरोषंसमभवत्क्षुधार्तस्यमहात्मनः निर्दग्धुमिवलोकांस्त्रीन्स्वशिष्यान्
…चावह ४५ पश्यध्वंविपरीतस्यदंडस्यादीर्घदर्शिनः विपत्तिंघोरसंकाशांदीप्तामग्निशिखामिव ४६ क्षयंत्वधर्मतःप्राप्तःसा
…स्तुनसंशयः यस्तुदीप्तहुताशस्यअर्चिःसंस्पृष्टवानिह ४७ यस्मात्सकृतवान्पापमीदृशंघोरसंमितं तस्मात्प्राप्स्यतिदुर्मेधाः
…स्तुवर्षमनुत्तमं ४८ सराजादेशसंयुक्तःसभृत्यबलवाहनः पापकर्मसमाचारोवधंप्राप्स्यतिदुर्मति ४९ समंताद्योजनशतंविषयेचा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यदुर्मतेः वर्षतेपांशुवर्षेणमहतापाकशासनः ५० सर्वसत्वानियानीहजंगमस्थावराणिच सर्वेषांपांशुवर्षेणक्षयःक्षिप्रंभविष्यति ५१
डस्यविषयोयावत्तावत्सवनमाश्रयं पांशुवर्षमिवाकाशंसप्तराश्रंभविष्यति ५२ इत्युक्त्वाक्रोधसंतप्तःतमाश्रमनिवासिनः जनोजनपद
ांतेनीयतामित्यवोचत ५३ उक्तमात्रेत्युशनसाआश्रमावसथोजनः क्षयात्तद्विषयात्तस्मात्स्थानश्चक्रेसवाह्यतः ५४ सतथोक्त्वामुनि
मरजामिदमब्रवीत् आश्रमेतिष्ठदुर्मेधेवसत्वेहसमाहिता ५५ श्रुत्वानियोगंतस्यर्षेररजाभार्गवीतदा तथेतिपितरंप्राहभार्गवंभृश-
ंताः ५६ इत्युक्त्वाभार्गवोवासंतस्मादन्यदुपाक्रमत् सप्तराहाद्भस्मसाद्भूतंयथोक्तंब्रह्मवादिना ५७ तस्यायंदंडविषयोविंध्यशैलस्य
शाप्तोत्युशनसारामतस्मिन्वैधार्मिकेकृते ५८ ततःप्रभृतिकाकुत्स्थदंडकारण्यमुच्यते एतत्तेसर्वमाख्यातंयन्मांपृच्छसिराघव
ामुपासितुंरामसमयोत्यतिवर्त्तते एतेमहर्षयोरामपूर्णकुंभाःसमंततः ६० कृतोल्मुकानरव्याघ्रपूजयंतिदिवाकरं सत्यैर्ऋषि
नैस्तुतैर्ब्रह्माादिभिर्वृतैः ६१ रविरस्तंगतोरामगच्छोदकमुपस्पृश अथतस्मिन्वनोद्देशेरम्येपादपशोभिते ६२ नदीतीरेगिरिवरे-
लाशनमंडिते नानापक्षिरवोद्यानेनानामृगसमाकुले ६३ सिंहव्याघ्रसमाकीर्णेनानाद्विजसमावृते गृध्रोलूकौप्रवदतोबहुवर्षग
पि ६४ अथोलूकस्यभवनंगृध्रःपापविनिश्चयः ममेदमितिकृत्वासौकलहंतेनचाकरोत् ६५ राजासर्वस्यलोकस्यरामोराजीवलो
तंप्रपद्यामवैशीघ्रंकस्यैतद्भवनंभवेत् ६६ गृध्रोलूकौप्रपश्येतांजातकोपावमर्षणौ रामंपप्रच्छतांशीघ्रंकलिव्याकुलचेतसौ ६७ तौ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परविद्वेषौस्पृशतश्चरणौनरां अथदृष्ट्वानरेंद्रंतंगृध्रोवचनमब्रवीत् ६८ सुराणामसुराणांचत्वंप्रधानोमतोमम बृहस्पतेश्चशुक्राच्च ‍रा॰ उ॰
शिष्टोमहाद्युते ६९ परावरज्ञोभूतानांमर्त्येचंद्रइवापरः दुर्निरीक्ष्योयथासूर्योहिमवानिवगौरवे ७० सागरश्चासिगांभीर्येलोकपाल-
श्चासि क्षांत्याधरण्यातुल्योसिशीघ्रत्वेत्यनिलोपमः ७१ गुरुत्वंसर्वसंपन्नःविष्णुरूपोसिराघव अमर्षीदुर्जयोजेतासर्वास्त्रविधिपार
शृणुष्वममदेवेशविज्ञाप्यंनरपुंगव ममालयंपूर्वकृतंबाहुवीर्येणवैप्रभो ७३ उलूकोहरतेराजन्त्वत्समीपेविशेषतः ईदृशोयंदुरा-
दाज्ञालोपकोनृप ७४ प्राणांतिकेनदंडेनएनंशासितुमर्हसि एवमुक्तेतुगृध्रेणउलूकोवाक्यमब्रवीत् ७५ शृणुदेवममज्ञाप्यंए
त्तोनराधिप सोमाच्छतक्रतोःसूर्यात्धनदाच्चयमात्तथा ७६ जायतेवैनृपोरामकिंचिद्भवतिमानुषः त्वंतुसर्वमयोदेवनारायणइवा
७७ यावत्तेसौम्यताराजन्सम्यक्प्राणिहितेप्रभो सम्यक्त्वरासिमानुष्येतेनसोमोपमोभवान् ७८ करोदंडेप्रजानाथदानेपापभ-
यह दातापहर्त्तागोप्ताचतेनेंद्रइवनोभवान् ७९ अधृष्यःसर्वयोधेषुतेजसाबानलोभवान् अक्षीण तपसालोकेतेनत्वंराम भास्करः
० साक्षाद्वित्तेशतुल्योसिअथवाधनदाधिकः वित्तायत्तासपद्मासीर्नित्यंसाराजसत्तम ८१ धनदस्यतुकोशेनधनदस्तेनवैभवान्
मःसर्वेषुभूतेषुस्थावरेषुचरेषुच ८२ शत्रौमित्रेचतेदृष्टिःसमतायातिराघव धर्मेणशासनंनित्यंव्यवहारविधिक्रमात् ८३ यस्यतुष्य ‍१४
सवैराममृत्युस्तस्याभिरक्षति गायसेतेनवैराजन्यमइत्यभिविश्रुतः ८४ यश्चैषमानुषोभावोभवतोनृपसत्तम आनृशंस्यपरोराजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वेषुकृपयान्वितः ८५ दुर्बलस्यत्वनाथस्यराजाभवतिवैबलम् अचक्षुषोभवेच्चक्षूरगतौचगतिर्भवेत् ८६ अस्माकमपिनाथस्त्वं
यतामत्रधार्मिकः भवतातन्नमंतव्यंयथैतेकिलपक्षिणः ८७ योत्रनाथःसपक्षींद्रोभवतैवविनिर्मितः अस्माम्यंदेवनोस्माकंसन्नि-
भवनःप्रभो ८८ भवनैवकृतंपूर्वंभूतग्रामचतुर्विधं ममालयंप्रविष्टस्तुगृध्रोमांबाधतेनृप ८९ त्वंहिदेवमनुष्येषुशास्तावैनरपुंगव ए
त्वातुवैरामःसचिवानाव्हयत्स्वयं ९० विसर्जयंतोविजयःसिद्धार्थोराष्ट्रवर्द्धनः अशोकोधर्मपालश्चसुमंतुश्चमहाबलः ९१ एतेरा
सचिवाराज्ञोदशरथस्यच नीतियुक्तामहात्मानःसर्वशास्त्रविशारदाः ९२ सुशांताश्चकुलीनाश्चनयेमंत्रेचकोविदाः तानाहूयस
मापुष्पकादवरुत्ह्यच ९३ गृध्रोलूकौविवदतौपृछत्यमरसत्तमः कतिवर्षाणितेगृध्रतवेदंनिलयंकृतं एतन्मेकारणंब्रूहियदिजाना
सः ९४ एतच्छुत्वातुवैगृध्रोभाषतेराघवेसितं इयंवसुमतीरामपुरुषैरूर्ध्वबाहुभिः ९५ उत्थितैराद्वृतासर्वातदाप्रभृतिमेगृहं उ
र्वीद्रामंपादपैरुपशोभिता ९६ यदैवपृथिवीराजन्नृतदाप्रभृतिमेगृहं एतच्छुत्वातुरामोवैसभासदमुवाचह ९७ नसासभायत्र
ते वृद्धानतेवृद्धाःयेनधर्मंवदंति नासौधर्मोयत्रनसत्यमस्तिकुतःसत्यंयच्छलेनानुबद्धं ९८ येतुसभ्यासभांगत्वातुष्णींध्यानमुपास
याप्राप्तंनब्रुवतेसर्वेतेनृतवादिनः ९९ जानन्नविब्रुवन्पृष्ठःकामात्क्रोधात्तथाभयात् सहसादारुणान्पाशान्आत्मनिप्रतिमुंच-
०० तेषांसंवत्सरेपूर्णेपाशमेकंप्रमुच्यते तस्मात्सत्यंतुवक्तव्यंजानतासत्यमंजसा १ एतच्छुत्वातुसचिवाराममेवाब्रुवंस्तदा उलू-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भनेराजन्नतुगृध्रोमहामते २ त्वंप्रमाणंमहाराजराजाहिपरमागतिः राजमूलाःप्रजासर्वाःराजधर्मःसनातनः ३ शास्ताराजानृ
ानतेगच्छंतिदुर्गतिं वैवस्वतेनमुक्ताश्चभवंतिपुरुषोत्तमाः सचिवानांवचःश्रुत्वारामोवचनमब्रवीत् श्रूयतामभिधास्यामिपुराणेय
तं ६ द्यौःसचंद्रार्कनक्षत्राःसपर्वतमहीद्रुमाः सलिलार्णवसंभूतंत्रैलोक्यंसचराचरं एकमेवतदाह्यासीत्समेकमिवांबरं पुनर्भूः
ह्याचविष्णोर्जठरमाविशत् ७ नाभ्यांविष्णोःसमुत्पन्नःपद्मंहेमविभूषितं सतुनिर्गम्यवैब्रह्मायोगीभूत्वामहाप्रभुः ८ सि
थिवींवायुपर्वतांश्चसवीरुधान् तदंतरेप्रजाःसर्वामनुष्यांश्चसरीसृपान् ९ जरायुजांडजान्सर्वान्ससर्जसुमहातपाः तस्यगा-
त्पन्नःकैटभोमधुनासह १० दानवौतौमहावीर्यौघोरौलब्धवरौतदा दृष्ट्वाप्रजापतिंतत्रक्रोधाविष्टौबभूवतुः ११ वेगेनमहतातौतु
भुवमचोचतां दृष्ट्वासत्वानिसर्वाणिनिःपद्यंतांप्रथग्विधाः मेधोगंधातुधरणीमेदिनीत्यभिसंज्ञिता तस्मान्नगृध्रस्यगृहंउलूकस्य
भवत् १३ तस्माद्गृध्रस्त्वसत्योवैपापकर्मापरालयम् अंगीकरोतिपापात्मादंडनीयोनसंशयः १४ अथाशरीरिणीवाणीअंतरिक्षा
बोधिनी मावधीद्रामगृध्रंत्वंपूर्वंदग्धंतपोबलात् १५ कलौगौतमदग्धोयंभोजनार्थेजनेश्वर ब्रह्मदत्तस्तुनामैवभूरःसत्यव्रतः-
चिः १६ गृहमागत्यविप्रोस्यभोजनंप्रत्यमार्गत साग्रंवर्षशतंचैषभुक्त्वानृषिसत्तमः १७ ब्रह्मदत्तस्तुवैतस्यआहारस्तुमहात्मनः
र्णंपयोददद्राजाहस्तेनाथपरामृशत् १८ अथक्रुद्धेनमुनिनाशापोदत्तोस्यदारुणः गृध्रत्वंगच्छवैराजन्नसौशप्तोत्यथाब्रवीत् १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=02.06.20 13:09
,TRANSFERRED=2020/06/02 at 13:17:54
,PAGES=29
,TYPE=STD
,NAME=S0003048
,Book Name=M-2971-SHRIMAD PURAN ANTRAGAT RAMCAHRIT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection